**प्रधानमन्त्री ब्राजील यात्रा**

प्रधानमन्त्री नरेन्द्र मोदी अद्य स्वीय पञ्चदेशानां यात्राया: चतुर्थे चरणे ब्राजीलदेशस्य रियो डी जेनेरियो इति नगरं सम्प्राप्त:। एतद् यात्रान्तर्गतं श्री मोदी सप्तदशे ब्रिक्स-शिखर-सम्मेलने भागं गृह्णीयात्। शिखर-सम्मेलनान्तर्गतं प्रधानमन्त्री नरेन्द्र मोदी वैश्विक-शासने शान्ति-सुरक्षा-बहुपक्षवाद सुदृढ़ीकरणम् अथ कृत्रिम-बुद्धिमता-उपयोगं, जलवायु-कार्यान्वयनं, वैश्विक-स्वास्थ्यं, आर्थिकं, वित्तीय-प्रकरणानि च समेत्य प्रमुखेषु विषयेषु विचारान् विनिमयीकरिष्यति। शिखर – सम्मेलनावधौ प्रधानमन्त्रिण: मोदिन: नैकैषु द्विपक्षीय-उपवेशनेषु भागग्रहणस्य सम्भावना अपि वर्तते। श्री मोदी ब्रासिलिया-इत्यत्रापि गमिष्यति, यत्र श्री मोदी राष्ट्रपतिना लुईस-इनासियो लूला दा सिल्वा – इत्यमुना साकं व्यापार – रक्षा – ऊर्जा-अन्तरिक्ष-प्रविधि-कृषि-स्वास्थ्य-इत्यादीनां विषये द्विपक्षीयां चर्चां विधास्यति।

**प्रधानमन्त्री-अर्जेण्टिना यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी गतदिने स्वस्या: पञ्चराष्ट्रिय-यात्रायाः तृतीये चरणे अर्जेण्टीना-देशस्य राजधानीम् ब्यूनस् ऐरेस्-नगरं प्राप्तवान्। यस्योद्देश्यं ग्लोबल्-साउथ् इत्यनेन सह भारतस्य सम्बन्धं सुदृढं करणमस्ति। अर्जेण्टीनियादेशस्य राजधान्यां आगत्य विशिष्टेन शास्त्रीयनृत्यप्रदर्शनेन भारतीयसमुदायेन तस्य स्वागतं कृतम्। व्यूहात्मकसहभागित्वं सुदृढं कर्तुं, उभयदेशयोः मध्ये सहयोगस्य नूतनान् मार्गान् उद्घाटयितुञ्च गतदिने सायङ्काले प्रधानमन्त्रिणः प्रतिनिधि-स्तरीय-वार्तालापः सम्पन्न:। प्रधानमन्त्री मोदी ट्रिनिडाड् एण्ड् टोबैगो इत्यस्य संसदः संयुक्तसम्मेलनम् अपि समबोधयत्। अस्मिन् अवसरे भाषणं कुर्वन्, श्रीमोदी अवदत् यत्, ग्लोबल्-साउथ् इत्यस्मै उच्चस्तरीयं योग्यस्थानञ्च दातुं भारतं स्वसहभागिभिः सह कार्यं करिष्यतीति।

**अमित शाह-गुजरातत:**

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः गतदिने गुजरातस्य आनन्द-नगरे देशस्य प्रथम-सहकारिता-विश्वविद्यालयरूपेण त्रिभुवन-सहकारी-विश्वविद्यालयस्य शिलान्यासं कृतवान्। कार्यक्रमावसरे श्रीशाहः अवदत् यत् गतचतुर्वर्षेषु सहकारमन्त्रालयेन षष्टिः नूतनानि उपक्रमाणि प्रारब्धानि। सहकारमन्त्रालयस्य स्थापना कोटिशः निर्धनानां ग्रामीणानाञ्च जीवने आशां जनयितुं अभवदिति।

**टेक्सास**

अमेरिकादेशे टेक्सास-नगरे अति-जल-प्रवाह-कारणेन न्यूनातिन्यूनं द्वात्रिंशत्-संख्याका: जना: कालकवलिता:, येषु एकविंशति-संख्याका: वयस्का: अपि। एतदनन्तरं तत्र आपत्सुरक्षाबलै: आपतरक्षा-कार्यान्वयनं वृहद्स्तरे चालितम्। एतदधिकृत्य संचार-तन्त्र-पटले प्रधानमन्त्री मोदी अमेरिकीय-शासनाय शोकसंतप्त-जनेभ्यश्च स्वीय-संवेदनां प्रकटितवान्।

**नेहल: मोदी**

संयुक्त-राज्य-अमेरिका-देशस्य न्यायविभागेन भारतीया: अधिकारिण: संसूचिता: यत् आर्थिक-अभियुक्तस्य नीरव-मोदिन: भ्राता नेहल: मोदी शुक्रवारे अमेरिकीय-अधिकारिभि: निगडित:। अवधेयं यत् नेहल: मोदी पंजाब-नेशनल-बैंक-प्रकरणे भारते वांछित: अस्ति।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: श्व: मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

**टेनिस – क्रीडा**

टेनिस-क्रीडायां शीर्षांक धारक: जैनिक सिनर् इत्यसौ पेट्रो-मार्टिनेज इत्यमुं षट्-एकम् , षट्-त्रि, षट्-एकम् इत्यन्तरालै- पराभूय चतुर्थे वर्षे विंम्बलडन प्रतियोगिताया: पुरुषैकलवर्गे चतुर्थ-चरणे सम्प्रविष्ट:।

॥ **इति वार्ता:**॥